दोषसमुत्थाः सह पिडकाभिः । तत्र कफादुदकेक्षुसुरासिकताशनैर्लवणपिष्टसान्द्रशुक्रफेनमेहाः दश साध्या दोषदूष्याणां समक्रियत्वात् । पित्तान्नीलहरिद्राम्लक्षारमञ्जिष्ठाशोणितमेहाः षट् याप्या दोषदूष्याणां विषमक्रियत्वात् । वातात्सर्पिर्वसाक्षौद्रहस्तिमेहाश्चत्वारोऽसाध्यतमा महात्ययिकत्वात् । तत्र वातपित्तमेदोभिरन्वितः श्लेष्मा श्लेष्मप्रमेहान् जनयति वातकफशोणितमेदोभिरन्वितं पित्तं पित्तप्रमेहान् । कफपित्तवसामज्जमेदोभिरन्वितो वायुर्व्वातप्रमेहान् । तत्र श्वेतमवेदनमुदकमेही मेहति इक्षुरसतुल्यमिक्षुमेही, सुरामेही सुरातुल्यं, सरुजम् सिकतानुविद्धं सिकतामेही शनैः सकफ स्तुतं शनैर्मेही, विशदं लवणतुल्यं लवणमेही, हृष्टरोमा पिष्टरसतुल्यं पिष्टमेही, आविलं सान्द्रं सान्द्रमेही, शुक्रतुल्यं शुक्रमेही स्तोकं स्तोकं सफेनं फेनमेही मेहति । अत ऊर्द्ध्वं पित्तनिमित्तान्वक्ष्यामः । सफेनमच्छं नीलं नीलमेही मेहति सदाहं हरिद्राभं हरिद्रामेही, अम्लरसगन्धमम्लमेही, स्तुत क्षारप्रतिभं क्षारमेही, मञ्जिष्ठोदकप्रकाशं मञ्जिष्ठामेही । शोणितप्रकाशं शोणितमेही मेहति । अत ऊर्द्ध्वं वातनिमित्तान्वक्ष्यामः । सर्पिःप्रकाशं सर्पिर्मेही मेहति वसाप्रकाशं वसामेही, क्षौद्ररसवर्णं क्षौद्रमेही, मत्तमातङ्गवदनुप्रबद्धं हस्तिमेही मेहति । मक्षिकोपसर्पणमालस्यं मांसोपचयः प्रतिश्यायः शैथिल्यारोचकाविपाकाः कफप्रसेकच्छर्द्दिनिद्राकासश्वासाश्चेति श्लेष्मजानामुपद्रवाः । वृषणयोरवदरणं वस्तिभेदो मेढ्रतोदो हृदिशूलमम्लीकाज्वरातीसारारोचका वमथुः परिधूमायनं दाहो मूर्च्छा पिपासा निद्रानाशः पाण्डुरोगः पीतविण्मूत्रनेत्रत्वञ्चेति पैत्तिकानाम् । हृद्ग्रहो लौल्यमनिद्रा स्तम्भः कम्पः शूलं बद्धपुरीषत्वञ्चेति वातजानाम् । एवमेते विंशतिः प्रमेहाः सोपद्रवा व्याख्याताः । तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैश्चानुगतधातोः प्रमेहिणो दश पिडका जायन्ते । तद्यथा । शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्त्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति । शरावमात्रा तद्रूपा निम्नमध्या शराविका । गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी । सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः । जालिनी तीव्रदाहा तु मांसजालसमावृता । महती पिडका नीला पिडका विनता स्मृता । महत्यल्पाचिता ज्ञेया पिडका सा तु पुत्त्रिणी । मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका । रक्तासिता स्फोटवती दारुणा त्वलजी भवेत् । विदारी कन्दवद्वृत्ता कठिना च विदारिका । विद्रधेर्ल्लक्षणैर्युक्ता ज्ञेया विद्रधिका बुधैः । ये यन्मयाः स्मृता मेहास्तेषामेतास्तु तत्कृताः । गुदे हृदि शिरस्यंसे पृष्ठे मर्म्मणि चोत्थिताः । सोपद्रवा दुर्ब्बलस्य पिडकाः परिवर्ज्जयेत् । कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः । अधः प्रक्रमते वायुस्तेनासाध्यास्तु वातजाः । प्रमेहपूर्व्वरूपाणामाकृतिर्यत्र दृश्यते । किञ्चिच्चाप्यधिकं मूत्रं तं प्रमेहिणमादिशेत् । कृत्स्नान्यर्द्धानि वा यस्मिन् पूर्व्वरूपाणि मानवे । प्रवृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत् । पिडकापीड़ितं गाढमुपसृष्टमुपद्रवैः । मधुमेहिनमाचष्टे स चासाध्यः प्रकीर्त्तितः । स चापि गमनात् स्थानं, स्थानादासनमिच्छति । आसनाद्वृणुते शय्यां, शयनात् स्वप्नमिच्छति । यथाहि वर्णानां पञ्चानामुत्कर्षापकर्षकृतेन संयोगविशेषेण शवलबभ्रुकपिलकपोतमेचकादीनाम् वर्णानामनेकेषामुत्पत्तिर्भवति । एवमेव दोषधातुमलाहारविशेषेणोत्कर्षापकर्षकृतेन संयोगविशेषेण । भवति चात्र । सर्व्व एव प्रमेहास्तु कालेनाप्रतिकारिणः । मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि" तत्रैव चिकित्सास्थाने सर्व्वप्रमेहस्य प्रकारान्तरेण द्वैविध्यमुक्तम् । यथा "द्वौ प्रमेहौ सहजोऽपथ्यनिमित्तश्च भवतः तत्र सहजो मातृपितृवीजदोषकृतः । अहिताहारजोऽपथ्यनिमित्तः । तयोः पूर्व्वेणोपद्रुतः कृशो रूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति उत्तरेण स्थूलो बह्वाशी स्निग्धः शय्यासनस्वप्नप्रायेणेति" 'तत्रोदकमेहिनं पारिजातकषायं पाययेत् इक्षुमेहिनं वैजयन्ती कषायम्" च सुश्रु०

**इक्षुयन्त्र** न० इक्षोर्निष्पीड़नं यन्त्रम् शा०त०। इक्षुनिष्पीड़के यन्त्रे ( महाशाल ) "गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः । अमीमांस्यानि शौचानि" स्मृतिः ।

**इक्षुयोनि** पु० इक्षोरिव योनिर्यस्य । पुण्ड्रके इक्षौ राजनि०

**इक्षुर** पु० इष–बा०–क्सुरच् । १कौलिकाक्षे ( कुलेखारा ) रत्ना० २गोक्षुरे (गोखुरी ) ३इक्षौ च शब्दारत्ना० ४काशे राजनि० । संज्ञायां कन् । १कोकिकाक्षे । २काशतृणे ३स्थूलशरे च राजनि० ।

**इक्षुरस** पु० इक्षोः रस इव रसो यस्य । ( नडा ) इति ख्याते काशे १तृणभेदे । 'काशः काशेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा । इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः । काशः स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः । मूत्रकृच्छ्राश्मरीदाहक्षयपित्तास्ररोगहृत्" भाव०प्र० । २तत्० ।